International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(4): 110-112
© 2026 IJMH
www.themultijournal.com
Received: 11-07-2026
Accepted: 06-08-2026
Publish : 08-08-2026

**अमितकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः

**Correspondence:**
**अमितकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः

# साहित्यसारग्रन्थे गुणस्वरूपम्

**अमितकुमारशुक्लः**

संस्कृतकाव्यशास्त्रे गुणानां स्थानं महत्त्वपूर्णं वर्तते । आचार्यभरतमुनिमारभ्य पण्डितराजजगन्नाथपर्यन्तं सर्वेऽपि आचार्याः काव्यगुणानां स्वरूपं स्वस्वदृष्ट्या विवेचितवन्तः। ऊनविंशतिशताब्द्यां प्रणीते स्वकीये साहित्यसारग्रन्थे महाकविः अच्युतरायमोडकः मम्मट-जगन्नाथादीनां सरणिम् अनुसृत्य गुणानां तर्कशुद्धं रसनिष्ठं च स्वरूपं प्रस्थापितवान् । काव्ये रसः मुख्योऽवयवी (आत्मा) अस्ति, गुणाश्च तस्य रसाङ्गस्य उत्कर्षविधायकाः अचलस्थितयो धर्माः सन्ति । काव्यप्रकाशकारेण मम्मटेनोक्तं यत् गुणाः आत्मनः शौर्यादिवत् रसस्य धर्माः भवन्ति । अस्मिन्नेव क्रमे ऊनविंशशताब्द्याः प्रख्यातविद्वान् अच्युतरायमोडकः स्वग्रन्थे 'साहित्यसारे' पूर्ववर्तिनां सिद्धान्तानां समन्वयम् अकरोत् । सः रसस्वरूपं सोपाधिकं मत्वा तत्र गुणानां अनिवार्यतां स्वीकरोति, यतो हि चित्तद्रुत्यादिजनकत्वात् गुणाः रसाद् अभिन्नरूपेण प्रकाशन्ते । साहित्यसारे गुणस्य लक्षणं रसपरकमेव विहितम् । काव्ये गुणाः न केवलं शब्दार्थयोः धर्माः, अपितु चित्तवृत्तेः परिचायकाः सन्ति । ग्रन्थकृन्मते रसोल्लाससमये चित्ते या द्रुति-दीप्ति-विकासात्मिकाः अवस्थाः जायन्ते, तासाम् आस्वादस्य मूलहेतवः गुणाः एव भवन्ति । अच्युतरायः पण्डितराजजगन्नाथस्य मतस्य खण्डनं कुर्वन् प्रतिपादयति यत् यदि रसः केवलं निर्मुक्ता चित्तवृत्तिः स्यात्, तर्हि गुणानां सत्ता निर्गुणे ब्रह्मण इव न सम्भवेत् । अतः "सविशेषे सोपाधिके च रसात्मके चित्ते गुणस्य सत्ता अवश्यमेव मन्तव्या" ।

यथा लोकव्यवहारे कस्यापि मनुष्यस्य शरीरे विद्यमानाः शौर्यधैर्योदारत्वादयः गुणास्तस्य आत्मन उत्कर्षं कुर्वन्ति, तथैव काव्यप्रपञ्चे माधुर्यौजप्रसादप्रभृतयः गुणाः रसस्योत्कर्षं विधाय सामाजिके-भ्योऽलौकिकानन्दं प्रयच्छन्ति ।

गुणसिद्धान्तस्यैतिहासिकयात्राऽतीववैविध्यपूर्णा अस्ति। अस्य मूलं भरतमुनेः 'नाट्यशास्त्रात्' आरभ्यते, यत्र नाट्यसौन्दर्याय दश गुणाः निर्दिष्टाः।[1] तदनन्तरं रीतिसम्प्रदायस्य प्रवर्तकेन आचार्यवामनेन **"काव्यशोभायाः कर्तारो धर्मा गुणाः"** इति उद्घोष्य गुणाय काव्यशास्त्रे नित्यधर्मत्वेन मूर्धन्यं स्थानं प्रदत्तम्।[2] परन्तु कालान्तरे ध्वन्यालोके आचार्यानन्दवर्धनेन तथा च काव्यप्रकाशे आचार्यमम्मटेन गुणस्य सम्प्रदायः सर्वथा परिष्कृतः। एतैः नव्याचार्यैः प्रतिपादितं यत् गुणाः शब्दार्थनिष्ठाः (बाह्याः) न भूत्वा मूलतः **रसनिष्ठाः** (आन्तरिकाः) भवन्ति, ते च सामाजिकानां चित्तवृत्तीनां नियामकाः सन्ति।[4]

काव्यप्रकाशे आचार्यो मम्मटः गुणां लक्षणं कुर्वन् वदति -

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥**[3]

अर्थात् अङ्गिनः (मुख्यस्य) रसस्य ये अचलस्थितयः (नित्याः) धर्माः सन्ति, ते गुणाः कथ्यन्ते। यथा मानवीयात्मनः धर्माः शौर्यादयः सन्ति (ये शरीरेण सह न, अपितु आत्मना सह सम्बद्धाः भवन्ति), तथैव रसस्य उत्कर्षं जनयित्वा रसभावं सर्वदा पोषयन्तः धर्माः 'गुणाः' उच्यन्ते। 'अचलस्थितयः' इत्यनेन स्पष्टं भवति यत् यत्र रसः अस्ति, तत्र गुणाः अवश्यं भविष्यन्ति।

विश्वनाथकविराजानुसारम् (साहित्यदर्पणे आचार्यः कविराजविश्वनाथो गुणविषये वदति -

**रसाङ्गशायिनो धर्माः शौर्याद्या इव चेतसः।**
**उत्कर्षहेतवस्ते स्युर्गुणा आत्मनि संस्थिताः॥**[4]

विश्वनाथः अपि मम्मटस्य मतं पुष्णाति। अस्य मते अपि गुणाः रसस्यात्मनि संस्थिताः सन्ति, ये सामाजिकानां चेतसि (चित्ते) आह्लादं जनयन्ति।

**भेदः-** यद्यपि प्राचीनैराचार्यैर्गुणानां संख्या दश वा विंशतिर्वा स्वीकृता, तथापि नव्यकाव्यशास्त्रे आनन्दवर्धमम्मटादिभिः सर्वेषां गुणानामन्तर्भावोऽधोलिखितेषु **त्रिषु** गुणेषु एव कृतः—

**माधुर्यगुणः -** यस्य काव्यस्य श्रवणेन सामाजिकानां हृदयं द्रवीभूतं भवति, तत्र माधुर्यगुणः भवति। अयं गुणः चित्तस्य द्रुतिर्द्रवीभावो वेति अवस्थां जनयति। गुणोऽयं मुख्यतया **शृङ्गाररसे** विशेषतः विप्रलम्भे, **करुणरसे**, **शान्तरसे** च तिष्ठति । अस्मिन् ट-ठ-ड-ढ- इत्यादि-कठोरवर्णानां निषेधः भवति। अनुनासिकवर्णानां तथा कोमलशब्दानां बाहुल्यं भवति। समासाः लघवः भवन्ति वा सर्वथा न भवन्ति।

**ओजगुणः -** यस्य काव्यस्य पठनेन श्रवणेन वा मनसि दीप्तिः उत्पद्यते, तत्र ओजोगुणः भवति। अयं गुणः चित्तस्य 'विस्तार' इति मानसिकदशां जनयति। अयं मुख्यतया **वीररसे**, **रौद्ररसे**, **बीभत्सरसे** च प्राधान्येन प्राप्यते । अस्मिन् द्वित्ववर्णानां यथा क्क, त्त, संयुक्तवर्णानां यथा क्र, प्र, ट-वर्गस्य वर्णानां तथा दीर्घसमासानां प्राचुर्यं भवति। महाप्राणध्वनयः अस्य शोभां वर्धयन्ति।

**प्रसादगुणः -** यथा स्वच्छे जले वस्त्रं क्षालितं सति जलं सर्वत्र सहसा प्रविशति, अथवा शुष्के इन्धने अग्निः झटिति प्रज्वलति, तथैव यस्य काव्यस्य श्रवणमात्रेण अर्थः बुद्धिं सहसा व्याप्नोति, तत्र प्रसादगुणः भवति। अयं चित्तस्य 'विकास' इति अवस्थां जनयति। अयं सर्वगुणसम्पन्नः गुणः अस्ति। एष **सर्वेषु रसेषु** तथा सर्वेषु काव्येषु साधारणरूपेण तिष्ठति । अस्मिन् वर्णयोजना अतीवसरला, सुबोधा, श्रुतिमधुरा च भवति। क्लिष्टशब्दानां दीर्घाणां समासानां च सर्वथा अभावः भवति। काव्यशास्त्रे प्रतिपादितं गुणसामान्यलक्षणं काव्यस्य आन्तरिकसौन्दर्यस्य उद्घाटने महतीं भूमिकां वहति। वामनेन साधिता 'काव्यशोभा' आनन्दवर्धनेन रसस्य उत्कर्षरूपेण परिणीता। गुणाः शब्दार्थयोः चमत्कारमात्राः न सन्ति, अपितु ते रसस्य आस्वाद-दशायां सामाजिकानां चित्तवृत्तीनां (चित्तद्रुत्यादीनां) नियामकाः सन्ति। अतः गुणसामान्यलक्षणस्य परिज्ञानं काव्यस्य गभीरत-मास्वादनाय शोधदृष्ट्या च अद्यापि परमं प्रासङ्गिकं वर्तते।

**साहित्यसारे गुणाः -**

संस्कृतसाहित्यशास्त्रे मूर्धन्यविद्वान् **आचार्यश्रीमदच्युतरायमोडकः** (अच्युतशर्मा) स्वकीये **'साहित्यसारः'** इति ग्रन्थे पूर्ववर्तिनां मतानां गम्भीरं मन्थनं कृत्वा गुणानां निरूपणम् अकरोत्। अयं ग्रन्थः द्वादशसु आर्तवेषु (रत्नेषु) विभक्तः अस्ति। अस्मिन् ग्रन्थे अच्युतरायेण रसनिष्ठानां गुणानां लक्षणं, स्वरूपं, तासाम् चित्तवृत्तिभिः सह सम्बन्धश्च अतीवतार्किकपद्धत्या प्रस्थापितः। स मम्मट-आनन्द-वर्धनादीनां नव्यमतानां अनुकरणं कुर्वन्नपि स्वकीयां वैशिष्ट्यपूर्णाम् अद्वैतवेदान्तदृष्टिं काव्यगुणेषु आरोपयति।

**साहित्यसारे गुणानां सामान्यलक्षणम् –** आचार्य अच्युतरायेण 'साहित्यसारः' ग्रन्थस्य 'पञ्चमे रत्ने' (मध्यकम्बुरत्ने) गुणानां सामान्यं लक्षणं शौर्यादिदृष्टान्तेन सह इत्थं प्रतिपादितमस्ति—

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥**[5]

अङ्गिनः अर्थात् मुख्यस्य रसस्य ये अपरिहार्याः (अचलस्थितयः) धर्माः भवन्ति, ते एव गुणाः इति कथ्यन्ते। यथा मानवीयशरीरे शौर्य-धैर्यादयः गुणाः आत्मनः उत्कर्षं जनयन्ति (न तु बाह्यशरीरस्य), तथैव काव्यप्रपञ्चे माधुर्यादयः गुणाः मूलतः रसस्य आन्तरिकधर्माः सन्ति।[4] शब्दार्थेषु गुणानां व्यवहारः केवलं उपचारेण (गौणरूपेण) भवति।

**गुणानां त्रैविध्यम् -** आचार्यवामनादिभिः प्राचीनैः आचार्याणां दशगुणानां मतं खण्डयितुं अच्युतरायः मम्मटवत् **त्रीन् एव गुणान्** मुख्यरूपेण अङ्गीकरोति। एते गुणाः सामाजिकानां चित्तवृत्तिभिः सह सम्बद्धाः सन्ति—

**माधुर्यगुणः -** यः गुणः सामाजिकानां चित्तं आल्हादेन द्रावयति (पिघलाता है), सः 'माधुर्यम्' उच्यते। अस्य जनिका चित्तवृत्तिः **'द्रुतिः'** कथ्यते। एषः गुणः सम्भोगशृङ्गारे, करुणे, विप्रलम्भशृङ्गारे, शान्तरसे च क्रमेण आधिक्येन तिष्ठति।[6]

**ओजोगुणः -** यस्य श्रवणेन चित्ते विस्तारः, उत्तेजना, तेजश्च जायते, सः 'ओजः' गुणः स्मृतः। अस्य जनिका चित्तवृत्तिः **'दीप्तिः'** अस्ति। एषः गुणः वीरबीभत्सरौद्रोद्भुतरसेषु मुख्यरूपेण प्राप्यते। अत्र दीर्घ-समासावली प्रयुज्यते।[6]

**प्रसादगुणः -** यः गुणः श्रवणमात्रेणैव अर्थं तथैव व्याप्नोति यथा शुष्ककाष्ठे अग्निः झटिति प्रज्वलति, स 'प्रसादः' कथ्यते। अस्य जनिका चित्तवृत्तिः **'विकासः'** अस्ति। एषः गुणः सर्वदोषरहितः सर्वप्रसन्नता-जनकश्च सन् **सर्वेषु रसेषु** सर्वेषु रचनासु च साधारणरूपेण व्याप्नोति।[7]

**साहित्यसारे गुणालंकारयोर्विवेकः -** अच्युतरायेण गुणालंकारयोः तात्त्विकः भेदः सुस्पष्टं निरूपितः अस्ति। तस्य मते गुणाः रसस्य **अन्तरङ्गाः** सखाः सन्ति, ये रस परिपाके नियताः भवन्ति। अलंकाराः (यथा अनुप्रासोपमादयः) शब्दार्थयोः **बहिरङ्गाः** धर्माः सन्ति, ये हार-कुण्डलादिवत् केवलं बाह्यशोभां वर्धयन्ति।[8] अलंकारं विना अपि उत्तमकाव्ये रसस्थितिः सम्भवति, परन्तु गुणं विना रसः निष्प्राणो भवति। गुणसामान्यलक्षणस्य स्पष्टीकरणाय अलंकारेण सह अस्य भेदः अतीव आवश्यकः अस्ति। साहित्यसारऽयं भेद इत्थं निरूपितः -

**आश्रयभेदः -** गुणाः **रसनिष्ठाः** (आन्तरिकाः) भवन्ति, परन्तु अलंकाराः **शब्दार्थनिष्ठाः** (बाह्याः, यथा- हारकुण्डलादयः) भवन्ति। (साहित्यसारः, पञ्चमं रत्नम्, कारिका १२ (व्याख्या)

**स्थितिभेदः-** गुणाः रसस्य 'अचलस्थितयः' (नित्याः) धर्माः सन्ति, परन्तु अलंकाराः 'चलस्थितयः' (अनित्याः) भवन्ति, अर्थात् अलंकारं विना अपि रसपरिपाकः सम्भवति।

**स्वरूपभेदः-** गुणाः चित्तवृत्तेः (यथा- द्रुतिः, दीप्तिः, विकासः) जनकाः भवन्ति, अलंकाराः तु केवलं बाह्यवैचित्र्यं कुर्वन्ति।

**निष्कर्षः -** भरतमुनेः नाट्यशास्त्राद् आरभ्य आचार्यवामनेन प्रवर्तिता 'काव्यशोभा' आनन्दवर्धन-मम्मतादिभिः नव्यआचार्यैः रसस्य उत्कर्षरूपेण परिणीता। गुणाः केवलं शब्दार्थयोः बाह्यचमत्कारमात्राः न सन्ति, अपितु ते काव्यस्यात्मनः (रसस्य) 'अचलस्थितयः' नित्याः धर्माः सन्ति।[9] एते त्रयः गुणाः क्रमशः सामाजिकानां चित्तवृत्तिषु द्रुतिं, दीप्तिं, विकासं च जनयन्ति, येन रसास्वादप्रक्रिया सुसरला सहजा च भवति।

साहित्यशास्त्रे प्रतिपादितं गुणलक्षणं तस्य सार्वभौमिकतां प्रकटयति। आधुनिकयुगे अपि कस्यापि देशस्य वा भाषायाः साहित्यस्य मूल्याङ्कनाय एषः सिद्धान्तः पूर्णतः प्रासङ्गिकः मार्गदर्शकश्च वर्तते। अतः गुणसिद्धान्तस्य गभीरं सूक्ष्मं च अध्ययनं शोधक्षेत्रे सर्वदैव महत्त्वपूर्णं स्थास्यति। आचार्यश्रीमदच्युतरायमोडकेन 'साहित्यसारे' कृतं गुणानां विवेचनं केवलं साहित्यालोचना नास्ति, अपितु मानवीयानां चित्तवृत्तीनां गभीरं मनोवैज्ञानिकं विश्लेषणं वर्तते। त्रिगुणात्मकप्रकृतेः साम्यमिव काव्येऽपि माधुर्योजप्रसादानां सामञ्जस्यमाचार्य आवश्यकमन्यते। साहित्यसारग्रन्थे गुणस्वरूपस्य विवेचनं प्राचीनालङ्कारिकाणां परम्परायाः पोषकं सत् नवीनतार्किकदृष्ट्या परिपुष्टं वर्तते । अच्युतरायमोडकेन गुणानां रसधर्मत्वं स्थापयित्वा काव्यशास्त्रे गुणानां रसस्य च नित्यसम्बन्धः सुदृढः कृतः, यः काव्यसौन्दर्यमीमांसायां श्लाघनीयो वर्तते ।

**पाद टिप्पणी -**

1. श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम्... नाट्यशास्त्रम्, सप्तदशोऽध्यायः, श्लोकः ९६
2. काव्यालङ्कारसूत्रवृत्तिः, ३.१.१
3. काव्यप्रकाशः, अष्टमः उल्लासः, कारिका-66
4. साहित्यदर्पणः, अष्टमः परिच्छेदः, कारिका १
5. साहित्यसारः, पञ्चमं रत्नम् (मध्यकम्बुरत्नम्), गुणलक्षणप्रकरणम्, कारिका, 1)
6. दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसे स्थितम्। साहित्यसारः, पञ्चमं रत्नम्, कारिका ८
7. शुष्केन्धानाविवानलः झटिति व्याप्नोति यः सर्वं स प्रसादः समरसेषु च। साहित्यसारः, पञ्चमं रत्नम्, कारिका १२
8. काव्यप्रकाशः, अष्टमः उल्लासः, कारिका ६७
9. काव्यप्रकाशः, अष्टमः उल्लासः, कारिका ६६